यन्मायामोहितधियः पुत्त्रदारगृहादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥
देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः ।
यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्म-
वञ्चकः॥
यस्त्वां विसृजते मर्त्त्य आत्मानं प्रियमीश्वरम ।
विपर्य्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजेत् ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ।
सर्व्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वां जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
अयं ममेष्टो दयितोऽनुवर्त्ती
मयाभयं दत्तममुष्य देव ! ।
सम्पाद्यतां तद्भवतः प्रसादो
यथा हि ते दैत्यपतौ प्रसादः ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्त्वन्नः करवाम प्रियन्तव ।
भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥
दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ।
सूदितञ्च बलं भूरि यच्च भारायितं भुवः ॥
चत्वारोऽस्य भुजाः शिष्टा भविष्यत्यजरामरः ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥
इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः ।
प्राद्युम्निं रथमारोप्य स वध्वा समुपानयत् ॥
अक्षौहिण्या परिवृतं सुवासःसमलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥
स राजधानीं समलङ्कृतां ध्वजै-
र्मनोरमैर्भूषितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनै-
रभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥
य एतत् कृष्णविजयं शङ्करेण च संयुगम् ।
संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजयः ॥"
इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणासुर-संग्रामे श्रीकृष्णविजयस्त्रिषष्टितमोऽध्यायः ॥

बा(वा)णलिङ्गं, क्ली, (बाणार्च्चनार्थं कृतं लिङ्गम् । अस्यास्य निरुक्तिरुक्ता हेमाद्रौ । यथा,—
"बाणः सदाशिवो देवो बाणो बाणान्तरो-
ऽपि च ।
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ॥")
नर्म्मदानद्युद्भवशिवलिङ्गम् । तस्य विवरणम् ।
यथा,—
"नर्म्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ताह्वये स्थितम् ॥
चान्द्रायणशतं कार्य्यं शम्भोर्नैवेद्यभक्षणात् ।
ग्राह्याग्राह्यविभागोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं वान्नं ग्राह्यं प्रसादसंज्ञया ॥
शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभिः ।
यतश्च सर्व्वलिङ्गेभ्यस्तद्धि पूज्यतमं मतम् ॥
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं मुनिभिस्तत्त्वदर्शिभिः ॥
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमवरं स्मृतम् ।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम् ॥
रुद्राक्षं शिवलिङ्गञ्च स्थूलस्थूलं प्रशस्यते ।
शालग्रामो नार्म्मदश्च सूक्ष्मसूक्ष्मो विशिष्यते ॥"
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम् यथा,—
"कोमलेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागश्च काश्मीरं पद्मरागतः ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमान्मौक्तिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्याद्धीरकं वरम् ।
हीरकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥"
इति मेरुतन्त्रे ६ प्रकाशः ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-कालोत्तरे ।
"बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुतः षड्मुख ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुख ! ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ।
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि च ॥"
इतीन्द्रलिङ्गलक्षणम् ॥
"आरक्तं हिव्यकीलालसुधासदृशं करोत्यलम् ।
आग्नेयं तच्छक्तिनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥"
इत्याग्नेयलिङ्गलक्षणम् ॥
"दण्डाकारं भवेद् याम्यमथवा रसनाकृति ।
यद्यदुक्तं मया तेन निर्व्वित्तं जायते तदा ।
निर्व्वित्तं निधनन्तेन क्रियते स्थापितेन तु ॥"
इति याम्यलिङ्गलक्षणम् ॥
"राक्षसं खड्गसदृशं शापयोगफलप्रदम् ।
कर्कराद्रिमलिनन्तु कुण्डकुञ्चियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थे न सुखप्रदम् ॥"
इति नैरृतलिङ्गलक्षणम् ॥
"वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
वृद्धिं सुखादैर्वैस्तत्संभोगाश्च मध्यगे ॥"
इति वारुणलिङ्गलक्षणम् ॥
"कृष्णं धूम्रं नवारुण्यं ध्वजाभं ध्वजमस्तकम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥"
इति वायुलिङ्गलक्षणम् ॥
"तृणपाशगदाकारं गुह्यकेशस्य मध्यगम् ॥"
इति कुवेरलिङ्गलक्षणम् ॥
"दिनं वाप्यथवा रात्रिं शस्याष्टाह्निकरैर्व्वलम् ।
अस्थिमूलाङ्कितं रौद्रं हिमकुण्डलवर्च्चसम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
"चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽग्रतः ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्सकौस्तुभाङ्कञ्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥"
इति वैष्णवलिङ्गलक्षणम् ॥
"शालग्रामादिसंस्थन्तु शशाङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
"अथ वक्ष्यामि ते विप्र चिह्नमेकादशं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाजूटसमन्वितम् ।
त्र्यम्बकाख्याह्वयं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चक्ररेखाविभूषितम् ।
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाह्वयम् ॥
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ॥
त्रिशूलडमरुधरं शुभ्ररक्तार्द्धभागतः ।
अर्द्धनारीश्वराकान्तं सर्व्वदेवैरभीष्टदम् ॥
ईषद्रक्तमयं कान्तं स्थूलं दीर्घं समुज्ज्वलम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महेश्वरः ।
एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ! ॥"
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
"उत्ताङ्कं श्रेयसे योग्यं शीर्षमन्तं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं छत्रचिह्नं वा श्रवणाग्नान्वितं मतम् ।
शशिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धिपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादिभिः प्रपूजितम् ॥
वसुदैः चेन्द्रयक्षैश्च गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शशाङ्कमण्डलप्रभम् ॥"
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
"इत्येतत् लक्षणं प्रोक्तं परीक्षातत्त्वकोविदैः ।
त्रिःसप्तपञ्चवारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥"
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्य-मवधार्य्यं लिङ्गञ्चेदधिकं तदोदासीनपूज्यम-